श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमदान्ध्रपूर्णगुरुभिरनुगृहीतं

# ॥ श्रीयतिराजमङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीयतिराजमङ्गळम् ॥

श्रीपराङ्कुशपादाब्ज सुरभीकृत मौलये।
श्रीवत्सचिह्ननाथाय यतिराजाय मङ्गळम् ॥ 1 ॥

नाथपद्माक्षरामार्यपादपङ्कज सेविने।
सेव्याय सर्वयमिनां यतिराजाय मङ्गळम् ॥ 2 ॥

पूर्णार्यपूर्णकरुणापात्रायामिततेजसे।
मालाधरप्रियायास्तु यतिराजाय मङ्गळम् ॥ 3 ॥

संसेव्य यामुनाचार्यं एकलव्योस्म्यहं गुरोः।
इत्येवं वदते नित्यं यतिराजाय मङ्गळम् ॥ 4 ॥

श्रीकाञ्चीपूर्णमिश्रोक्त रहस्यार्थविदे सदा।
देवराजप्रियायास्तु यतिराजाय मङ्गळम् ॥ 5 ॥

श्रीमद् गोष्ठीपुरीपूर्णदिव्याज्ञां कुर्वते मुदा।
श्लोकार्थं गृह्णते तस्मात् यतिराजाय मङ्गळम् ॥ 6 ॥

कूरेशकुरुकानाथदाशरथ्यादिदेशिकाः।
यच्छिष्या भान्ति ते तस्मै यतिराजाय मङ्गळम् ॥ 7 ॥

चरमश्लोकतत्त्वार्थं ज्ञात्वार्याज्ञां विलङ्घ्य च।
दिशते तं स्वकीयेभ्यः यतिराजाय मङ्गळम् ॥ 8 ॥

श्रीशैलपूर्णकृपया श्रीरामायणमर्थतः।
भक्त्या येन श्रुतं तस्मै यतिराजाय मङ्गळम् ॥ 9 ॥

शङ्करादिकुदृष्टीनां बाह्यानां निधनाय च।
श्रीभाष्यं कुर्वते तस्मै यतिराजाय मङ्गळम्॥ **10**॥

कुर्वन्नुपनिषद्भाष्यं जगद्रक्षां करोति यः।
दयायाः परतन्त्राय भाष्यकाराय मङ्गळम्॥ **11**॥

द्रमिडोपनिषद्व्याख्यां कालयेति कृपाबलात्।
शासते कुरुकेशं तं भाष्यकाराय मङ्गळम्॥ **12**॥

गत्वा तु शारदापीठं वृत्तिं बोधायनस्य च।
अवलोक्यागतायास्तु भाष्यकाराय मङ्गळम्॥ **13**॥

परमाणुमृषावादिवादिसंहारकारिणे।
तस्मै भगवते श्रीमद्भाष्यकाराय मङ्गळम्॥ **14**॥

श्रीमत्कुरङ्गपूर्णाय श्रीभाष्यं वदते स्वयम्।
पित्रे संपत्सुतस्यापि भाष्यकाराय मङ्गळम्॥ **15**॥

दत्वा वृषगिरीशस्य शङ्खचक्रे रमापतेः।
परमप्रीतियुक्ताय भाष्यकाराय मङ्गळम्॥ **16**॥

सन्यासं कुर्वते काञ्च्यां अनन्तसरसीतटे।
वरदे न्यस्तभाराय भाष्यकाराय मङ्गळम्॥ **17**॥

श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः।
कान्तिमत्यां प्रसूताय यतिराजाय मङ्गळम्॥ **18**॥

शेषो वा सैन्यनाथो वा श्रीपतिर्वेति सात्विकैः।
वितर्क्याय महाप्राज्ञैः यतिराजाय मङ्गळम्॥ **19**॥

प्रकृष्टगुणपूर्णाय प्राप्याय स्वाङ्घ्रिसेविनाम्।
प्रपन्नसार्थवाहाय यतिराजाय मङ्गळम्॥ **20**॥



sunder kidambi prapatti dot com sunder kidambi

वेदात्मकप्रमाणेन सात्विकैश्च प्रमातृभिः।
प्रमेयेण सह श्रीमान् वर्धतां यतिशेखरः॥ 21 ॥

॥ इति श्रीयतिराजमङ्गळं समाप्तम् ॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi